षडशीतिमुखेऽतीते हृत्ते च विषुवद्वये ॥
भविष्यत्ययने पुण्यमतीते चोत्तरायणे ।
आदौ पुण्यं विजानीयात् यद्यभिन्ना तिथि-
र्भवेत् ॥"

त्रिंशकला विंशतितमी कला संक्रान्तिक्षणादूर्द्ध्वं यावद्भवति तावत् पुण्यम् । निरंशेऽंशशून्ये संक्रान्तिकाले हि भास्करोऽंशरहितो भवति तस्मिन् दृष्टे दिवेति यावत् । दिनञ्च दिनकरकरसंस्कृतास्त्रिंशन्नाड़िका इति ज्योतिर्विदः । तदन्तं तत्समाप्तिं यावत् तावत् पुण्यम् । तथा च वृद्धवशिष्ठः । त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृताः । नाड़ी दण्डः ।

"उत्पलाद्विपलं षष्ट्या विपलात्तु पलं नयेत् ।
पलात्षष्ट्या नयेन्नाड़ीं तत्षष्ट्या तु रवेर्द्दिनम् ॥"
इति सिद्धान्तसन्दर्भात् ॥

ततश्च देवीपुराणवृद्धवशिष्ठयोरेकवाक्यतया कलानाड्योः पर्य्यायता ॥*॥ रात्रिसंक्रमणे त्वाह अर्द्धरात्रे त्विति । असम्पूर्णे कलान्यूनार्द्धरात्रे ।

"कलान्यूनार्द्धरात्रे तु यदि संक्रमणं भवेत् ।
तदहः पुण्यमिच्छन्ति गार्गगालवगौतमाः ॥"

इति कृत्यचिन्तामणिवर्षकृत्यधृतगर्गवचनात् । कालकौमुद्याञ्च गालवेत्यत्र हारीत इति पाठः । ततश्च कलान्यूनार्द्धरात्राभ्यन्तरे द्वादशस्वेव संक्रान्तिषु अनागतं नागतं संक्रमणेन यत् दिवा तदेव पुण्यं पुण्यजनकम् । तत्तु पूर्व्वदिनं तदैव संक्रान्तेरनागतत्वसम्भवात् । तेन संक्रमणकालादर्व्वागेव दिवापरार्द्धे स्नानादिकं कर्त्तव्यमित्यर्थः । अर्द्धरात्रे व्यतीते कालाधिकार्द्धरात्रे व्यतीते । संपूर्णे अर्द्धरात्रे रात्रिमध्यकलयोः । कलान्यूनार्द्धरात्रे त्विति वचनानन्तरं भुजबलभीमे ।

'अर्द्धरात्रे कलाधिक्ये यदा संक्रमते रविः ।
तदोत्तरदिनं ग्राह्यं स्नानदानजपादिषु ॥
अर्द्धरात्रे तु संपूर्णे यदा संक्रमते रविः ।
प्राहुर्द्दिनद्वयं पुण्यं त्यक्त्वा मकरकर्कटौ'

इति वचनाभ्यां तथा प्रतीतेः । कालविवेके कालकौमुद्याञ्च शातातपजाबालौ ।

"पूर्णे चेदर्द्धरात्रे तु रविसंक्रमणं   ।
प्राहुर्द्दिनद्वयं पुण्यं त्यक्त्वा मकरकर्कटौ ॥"

एतयोर्व्यवस्था आह कालमाधवीये भविष्योत्तरीयम् ।

मिथुनात् कर्किसंक्रान्तिर्यदि स्यादंशुमालिनः ।
प्रदोषे वा निशीथे वा कुर्य्यादहनि पूर्व्वतः ॥
कार्म्मुकान्तु परित्यज्य झषं संक्रमते रविः ।
प्रभाते वार्द्धरात्रे वा स्नानं कुर्य्यात् परेऽहनि ॥

ततश्च रात्रिमध्यदण्डद्वयात्मकार्द्धरात्रसंक्रान्तावुदयेऽस्तमयेऽपि वा इत्यनेन उदयोपक्रममस्तमयान्तञ्च मानार्द्धं पुण्यम् । एवञ्चोभयदिने पुण्यकाले पूर्व्वदिनाकरण एव परदिने ।

"उक्तः कार्य्यस्तदा कर्त्तव्यः पूर्व्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम् ॥"
इति लिङ्गपुराणात् मोक्षधर्म्माच्च ॥

तत्रापि दक्षिणायने पूर्व्वदिनार्द्धमात्रमिति विशेषः । उत्तरायणे परदिनार्द्धमात्रमिति विशेषः । मानार्द्धमिति भास्करे भास्करोपलक्षिते काले दिवेति यावत् तस्मिन् संक्रमणेऽपि मानार्द्धं पुण्यम् । एतच्च विषुवषड़शीतिविषयम् । अयनकालयोः पूर्व्वमुक्तत्वात् विष्णुपद्याश्चोभयतः षोड़शकलानां पञ्चदशनाड़िकानां वा पुण्यत्वस्य शातातपादिवचनेन वक्ष्यमाणत्वात् । तेन दिवासंक्रमण एवायनादित्वेन पुण्यकाले विशेषः । रात्रिसंक्रमणे तु अर्द्धरात्रीयमकरकर्कटसंक्रमणव्यतिरिक्ते सर्व्वेषां तुल्यतेति । अपूर्णे शर्व्वरीदले कलान्यूनार्द्धरात्रे इत्यत्रापि मानार्द्धमित्यनुषज्यते । दिवापुण्यमिति यत् प्रागुक्तं अत्र तदेव मानार्द्धत्वेन विशेषितमित्यपुनरुक्तिः । एवमुदयास्तमये यन्मानार्द्धं पुण्यं तत् किमेकदिने दिनयोर्व्वेति तत्राह संपूर्णे तूभयोरिति उभयोः पूर्व्वापरदिनयोर्म्मानार्द्धं पुण्यं तेन पूर्व्वदिनस्यास्तमयपर्य्यन्तं परदिनस्य उदयमारभ्य मानार्द्धं पुण्यमित्यर्थः । अतिरेके अर्द्धरात्रात् परतः संक्रमणे परेऽहनि मानार्द्धं पुण्यमित्यनुषज्यते । मानार्द्धन्तु प्रहरद्वयम् ।

"अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरि क्रिया ।
ऊर्द्ध्वं संक्रमणे भानोरुदयात् प्रहरद्वयम् ।
पूर्णार्द्धरात्रसंक्रान्तौ द्वे दिनार्द्धे तु पुण्यदे ॥"

इति संवत्सरप्रदीपगङ्गावाक्यावलीधृतवशिष्ठसौरधर्म्मवचनैकवाक्यत्वात् !

"अर्द्धरात्रादधस्त्वेव दिनार्द्धस्योपरि क्रिया ।
ऊर्द्ध्वं संक्रमणे भानोरुदयात् प्रहरद्वयम् ॥"

इति भोजराजकृत्यचिन्तामणिधृतैकवाक्यत्वाच्च अधः पूर्व्वं ऊर्द्ध्वं परतः । क्रिया स्नानादिका । एवञ्च गर्गवचनस्थतदहरिति यामद्वयपरम् । अन्यथा मूलभूतश्रुत्यन्तरकल्पनापत्तेः । एवञ्च षडशीतिमुखेऽतीते इत्यादि दिवासंक्रमणविषयम् । तेन दिवा षडशीतिसंक्रमणे भूते भविष्यन्मानार्द्धं पुण्यं एवं विषुवद्वयेऽपि । दिवोत्तरायणेऽपि भ अग्रिमशतदण्डानां पुण्यत्वम् । अत्रोत्तरायणस्य पृथगभिधानात् अयन इति पदं दक्षिणायनपरं गावलीवर्द्दन्यायात् । तेन दिवा दक्षिणायने भविष्यति भूतत्रिंशद्दण्डानां पुण्यत्वम् । एवञ्च षड़शीत्यादिष्वप्यवकाशमलभमानम् ।

"अर्व्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोड़श ।
कालः पुण्योऽर्कसंक्रान्तेर्व्विद्वद्भिः परिकीर्त्तितः ॥"
इति शातातपीयम् ।

"अतीतानागतो भोगो नाड्यः पञ्चदश स्मृता ।"

इति देवीपुराणीयञ्च वचनं दिवा विष्णुपदीविषयम् । अतएव जाबालिवृद्धवशिष्ठौ ।

'पुण्याख्या विष्णुपद्याञ्च प्राक् पश्चादपि षोडश ।'

अर्द्धरात्रे विशेषमाह आदावित्यादि । अर्द्धरात्रसंक्रान्तावादौ पूर्व्वदिन एव मानार्द्धं पुण्यम् । यद्यभिन्ना संक्रान्तिकाले पूर्व्वदिने च एकैव तिथिर्भवेत् तेन मध्यरात्रे संक्रमणे यदुभयदिनमानार्द्धं पुण्यमुक्तं तद्भिन्नतिथिविषयम् । अतीते पुनरर्द्धरात्रे पूर्व्वेणाक्ता तिथ्यभेदेऽपि परदिनस्यैव पूर्व्वार्द्धं पुण्यमिति तात्पर्य्यार्थः ॥ एवञ्च रात्रिसंक्रान्तौ दिन एव पुण्यत्वाभिधानात् ।

"राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्य्युर्निशि काम्यव्रतेषु च ॥"

इति देवलेन दिनसंक्रमणस्य रात्रिप्रविष्टपुण्यकालांशे संक्रान्तिनिमित्तेन स्नानदानादि विधीयते इति ॥ * ॥ यत्तु ।

"मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप
मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वाङ्क्षीं विजानीयादुग्रे घोरा प्रकीर्त्तिता
चरे महोदरी ज्ञेया क्रूरे च चैव राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रितर्क्षैस्तु संक्रमे ॥"

इत्येतैर्द्वादशस्वेव संक्रान्तिषु ध्रुवादिनक्षत्रयोगान्मन्दादिरूपतया सप्तधाभिन्नासु ।

"त्रि चतुः पञ्च सप्ताष्ट नव द्वादश एव च ।
क्रमेण घटिका ह्येतास्तत्पुण्यं पारमार्थिकम् ॥"

इति देवीपुराणे एव त्रिचतुरादिघटिकानां पुण्यत्वमुक्तं तद्दिवारात्र्योस्तत्तत्कालोपदेशात् अवकाशमलभमानं सन्ध्याद्वयसंक्रान्तिविषयमिति समयप्रकाशः ॥*॥ ध्रुवादिगणस्तु दीपिकायाम्

"उग्रः पूर्व्वमघान्तकाः ध्रुवगणास्त्वाण्युत्तराणि स्वभू-
र्व्वातादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः ।
चित्रामित्रमृगान्त्यभं मृदुगणस्तीक्ष्णोऽहिरुद्रेन्द्रयुक्
मिश्रोऽग्निः सविशाखभः शुभफलाः सर्व्वे स्वकृत्ये गणाः ॥"

अन्तको भरणी । स्वभू रोहिणी । वातादित्यहरित्रयं स्वाती पुनर्वसुः श्रवणा धनिष्ठा शतभिषा । मित्रमृगान्त्यभं अनुराधामृगशिरो रेवत्यः । अहिरुद्रेन्द्रयुक् अश्लेषा आर्द्रा ज्येष्ठा मूला । अग्निः कृत्तिका । कल्पतरुस्तु । क्रमेण यथासंख्येन एता घटिकास्तत्पुण्यं तस्य संक्रमणस्य पुण्यहेतुत्वात् पुण्यं पारमार्थिकं मुख्यम् ।

"त्रुटेः सहस्रभागो यः स कालो रविसंक्रमः ।
इत्युक्तसूक्ष्मसङ्क्रमकाले नानुष्ठानजन्यपुण्यसम्पूर्ण्यतैव इत्याह । त्रुटिस्तु ।

"लघ्वक्षरचतुर्भागस्त्रुटिरित्यभिधीयते ।
त्रुटिद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयम् ॥"
इति स्मृत्युक्तः ॥

एतदेव मतं युक्तम् । अतएव देवलेन ।

"या याः सन्निहिता प्रस्तास्ताः पुण्यतमाः स्मृताः ।"